क१४

॥ इदं पुस्तकं किरात निळकंठस्यश्री ॥

॥श्रीगणेशाय नमः॥ ॥श्रियः कुरूणामधिपस्य पालिनीं प्रजासु वृत्तिं यमयुंक्त वेदितुं॥ सवर्णि
लिंगी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः॥१॥ कृतप्रणामस्य महीं महीभुजे जितां सप
त्नेन निवेदयिष्यतः॥ न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छंति मृषा हितैषिणः॥२॥ द्विषां वि
घाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः॥ स सौष्ठवौदार्यविशेषशालिनीं
विनिश्चितार्थामिति वाचमाददे॥३॥ क्रियासु युक्तैर्नृप चारचक्षुषो न वंचनीयाः प्रभवोनुजीवि
भिः॥ अतोर्हसि क्षंतुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥४॥ स किंसखा साधु न शास्ति
योधिपं हितं न यः संशृणुते स किंप्रभुः॥ सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः॥५॥
निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जंतवः॥ तवानुभावोयमवेदि यन्मया नि
गूढतत्वं नयवर्त्म विद्विषां॥६॥ विशंकमानो भवतः पराभवं नृपासनस्थोपि वनाधिवासिनः॥
दुरोदरछद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः॥७॥

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसंपदा यशः॥ समुन्नयन्भूतिमनार्यसंगमाद्
वरं विरोधोपि समं महात्मभिः॥८॥ कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना॥ विभ
ज्य नक्तंदिवमस्ततंद्रिणा वितन्यते तेन नयेन पौरुषं॥९॥ सखीनिव प्रीतियुजोनुजीविनः समा
नमानान्सुहृदश्च बंधुभिः॥ स संततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बंधुतां॥१०॥
असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया॥ गुणानुरागादिव सख्यमीयिवा
न्न बाधतेस्य त्रिगणः परस्परं॥११॥ निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियां॥
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया॥१२॥ वसूनि वांछन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः॥ गुरूपदिष्टेन रिपौ सुतेपि वा निहंति दंडेन स धर्मविप्लवं॥१३॥
विधाय रक्षान्परितः परेतरानशंकिताकारमुपैति शंकितः॥ क्रियापवर्गेष्वनुजीविसात्कृताः कृत

कि॰

क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदंति संपदः ॥१४॥ अनारतं तेन पदेषु लंभिता वि-
भज्य सम्यग्विनियोगसत्क्रियां ॥ फलंत्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसंपदः ॥
॥१५॥ अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरं ॥ नयत्ययुग्मछदगंधि-
रार्द्रतां भृशं नृपोपायनदंतिनां मदः ॥१६॥ सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्य-
संपदः ॥ वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ॥१७॥ उदारकीर्तेरुद-
यं दयावतः प्रशांतबाधं दिशतोभिरक्षया ॥ स्वयं प्रदुग्धेस्य गुणैरुपस्नुता वसूपमानस्य वसू-
नि मेदिनी ॥१८॥ महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ॥ न संहतास्त-
स्य न भिन्नवृत्तयः प्रियाणि वांछंत्यसुभिः समीहितुं ॥१९॥ महीभुजां सच्चरितैश्चरैः क्रियाः स वे-
द निःशेषमशेषितक्रियः ॥ महोदयैस्तस्य हितानुबंधिभिः प्रतीयते धातुरिवेहितं फलैः ॥२०॥

॥२॥

न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननं ॥ गुणानुरागेण शिरोभिरुह्यते नरा-
धिपैर्माल्यमिवास्य शासनं ॥२१॥ स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ॥ म-
खेष्वखिन्नोनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसं ॥२२॥ प्रलीनभूपालमपि स्थिरायति
प्रशासदावारिधि मंडलं भुवः ॥ स चिंतयत्येव भियस्त्वदेष्यतीरहो दुरंता बलवद्विरोधिता ॥२३॥
कथाप्रसंगेन जनैरुदाहृतादनुस्मृताखंडलसूनुविक्रमः ॥ तवाभिधानाद्व्यथते नताननः स
दुःसहान्मंत्रपदादिवोरगः ॥२४॥ तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरं ॥ पर-
प्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ॥२५॥ इतीरयित्वा गिरमात्तसत्क्रिये
गतेथ पत्यौ वनसंनिवासिनां ॥ प्रविश्य कृष्णा सदनं महीभुजस्तदाचचक्षेनुजसंनिधौ वचः ॥२६॥
निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियंतुमक्षमा ॥ नृपस्य मन्युव्यवसायदीपि-

3

कि०१

जगाद१ अकुटिलमतीन्५ पण्डितेषु१ समाचारः२ मनःपीडाः२ तिरस्कारइव१ नियोगवत्
पालिता२ स्तः१ प्रेरयंति२ न सन्ति तंतनुत्राणाच्छादितांगान्५ वशपांप मदस्राविणा३ अनवच्छिन्नं२ अपकारिणः॥

नीरुदाजहार द्रुपदात्मजा गिरः॥२७॥ भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनं। तथापि वक्तुं व्यवसाययंति मां निरस्तनारीसमया दुराधयः॥२८॥ अखंडमाखंडलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः॥ त्वया स्वहस्तेन मही मदच्युता मतंगजेन स्रगिवापवर्जिता॥२९॥ व्रजंति ते मूढधियः पराभवं भवंति मायाविषु ये न मायिनः॥ प्रविश्य हि घ्नंति शठास्तथाविधानसंवृतांगान्निशिता इवेषवः॥३०॥ गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः॥ परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियं॥३१॥ भवंतमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि॥ कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः॥३२॥ अवंध्यकोपस्य विहंतुरापदां भवंति वश्याः स्वयमेव देहिनः॥ अमर्षशून्येन जनस्य जंतुना न जातहार्देन न विद्विषादरः॥३३॥ परिभ्रमंल्लोहितचंदनोचितः पदाति

शंपरागतानां४ प्रज्वालितः२ स्नेहः१ सफलः३ दंसः इति शेषः २ अर्पितः२ अनुकूलसहायवान्५ निष्कोपेन२ रक्तानां
अभिमानिनां३ निंदिते३ निग्रहानुग्रहसमर्थस्य२ नप्रदीपयति३ उद्दीपितः३

जनाः४ ॥३॥ रक्तः१

२ ॥३॥

---

पल्लवं२ दत्तवान्२ निपमा४ रथचारी१ हैमरोर्ध्वदिक२ न तापयुति२ सकुं४ गं प्राप्नुतिप बहुलो
संतोषौ४ देशान्२ नकुलसहदेवौ४ नप्रवर्तसे४ केशैः व्याप्तौ२

रंतर्गिरिरेणुरूषितः॥ महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः॥३४॥ विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः॥ स वल्कवासांसि तवाधुना हरन्करोति मन्युं न कथं धनंजयः॥३५॥ वनांतशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ॥ कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुं॥३६॥ इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः॥ विचिंतयंत्या भवदापदं परां रुजंति चेतः प्रसभं ममाधयः॥३७॥ पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमंगलैः॥ अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः॥३८॥ अनारतं यो मणिपीठशायिनावरंजयद्राजशिरःस्रजां रजः॥ निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषां॥३९॥ पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदंधसा॥ तदद्य ते वन्यफ

शायिनौ३ कुरुणां१ परचक्र१ पर्यंकं बहुमूल्यं अमंगलैः३ रक्षिते३ निरंतरं३ ओदनान्नेन१
आवितं१ मनोहरत्वं१ निधनः२ द्विजानुत्कायष्टितेन१

बलात् ॥ छिन्ना२



५

स्वीकुर्वते५ सामान्नानी कृभालंत२ परिध्यौ? अवगाप्यूर? परावर्तं६ शत्रुकृतं४
ज्ञानाति६ संतोषं५ अंगीकुरु गतः५ अभिमानिता५

कि०१ ॥ मू०१

काशिनः परंपरैति कोर्थ्यं यशसा समं वपुः ॥४०॥ द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मू-
लयतीव मे मनः ॥ परैरपर्यासितवीर्यसंपदां पराभवोप्युत्सव एव मानिनां ॥४१॥ विहाय शांतिं
नृप धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषां ॥ व्रजंति शत्रूनवधूय निस्पृहाः शमेन सिद्धिं मु-
नयो न भूभृतः ॥४२॥ पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशं ॥ भवादृ-
शाश्चेदधिकुर्वते रतिं निराश्रया हंत हता मनस्विता ॥४३॥ अथ क्षमामेव निरस्तविक्रमश्चि-
राय पर्येषि सुखस्य साधनं ॥ विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सन् जुहुधीह पावकं ॥
॥४४॥ न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ॥ अरिषु हि विजयार्थिनः क्षिती-
शा विदधति सोपधि संधिदूषणानि ॥४५॥ विधिसमयनियोगाद्दीप्तिसंहारजिह्मं शिथिल-
वसुमगाधे मग्नमापत्पयोधौ ॥ रिपुतिमिरमुदस्योदीयमानं दिनादौ दिनकृतमिव लक्ष्मीस्त्वां

॥४॥

कुर्वंति२ परिपालनं३ कारणं४ तापनं? अपकारतत्परेषु३ चिह्नं४ दैवं२ कालः२ नियमः सूर्यमिव१ ग्लानय? मग्नं कुरु४ राज्यं१
लीनं१ सकपटं यथा स्यात्२ अपकारः एव प्रधानं२ निरस्य उपनं२ प्रतापस्य संक्षेपेण? लीनं२ गतं२

आगच्छतु१ उक्तो२ मनोहरां२ कुबेरात४ आश्रित्य उदाहरति५ अल्पाश्चर्ये६ युक्तियुक्तं२ उर्जितार्थे यस्मिन्२

समभ्येतु भूयः ॥४६॥ ॥ इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारवीकृतौ प्रथमः सर्गः ॥
॥१॥ छ ॥ विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीं ॥ उपपत्तिमदूर्जिताश्रयं नृपमू-
चे वचनं वृकोदरः ॥१॥ यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा ॥ अपि वागधिपस्य
दुर्वचं वचनं तद्विदधीत विस्मयं ॥२॥ विषमोपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः ॥
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥३॥ परिणामसुखे गरीयसि व्यथकेस्मिन्व-
चसि क्षतौजसां ॥ अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥४॥ इयमिष्टगुणाय रो-
चतां रुचिरार्था भवतेपि भारती ॥ ननु वक्तृविशेषनिस्पृहा गुणगृह्या वचने विपश्चितः ॥५॥ च-
तसृष्वपि ते विवेकिनी नृपविद्यासु निरूढिमागता ॥ कथमेत्य मतिर्विपर्ययं करिणी पंकमि-
वावसीदति ॥६॥ विधुरं किमतः परं परैरवगीतां गमिते दशामिमां ॥ अवसीदति यत्सुरैर

द्रौपदी३ गुरुः५ साधुः५ २

नरपतिः२ नीरूपं४ बलं४ द्वितीयपक्षे स्त्रीता? व्यथकेदुःखकरके४ परिपाके सुखहेतौ५ विरुद्धः३
मनोहरः३ कष्टं२ सामर्थ्यं४ प्रसिद्धि आसा२ गर्हितां२ प्राप्ता२ आश्रिते मतिः२ आविवेकतां२

साधुशक्तुयान२ मनोहर४ शांतिकरानु२ इदत्स्य नत्यक्ता५ उन्मत्तं गजमिव२ हस्व४ विक्रि
प्रमाता बाधः४ आक्रांत३ अनंगकर्ष अनुनेतुं२ अशुभवाहः२ कोपगृहः१ विकारः२

हेतारस्तेन वानुलान्नूद्विषतां कः शांतमन्युतेजसः॥२३॥ स्वकृतं सततं वैरिकृत
स्य चेतसि॥ विदधातु मनीषि चेतरो रिपुनारीनयनांबुसंततिः॥२४॥ इति दर्शितविक्रियं सुतं
मरुतः कोपपरीतमानसं॥ उपसांत्वयितुं महीपतिर्द्विरदं दुष्टमिवोपचक्रमे॥२५॥ अपवर्जित
विप्लवे शुचौ हृदयग्राहिणि मंगलास्पदे॥ विमलातव विस्तरे गिरां मतिरादर्श इवाभिद
श्यते॥२६॥ स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवं॥ रचिता पृथगर्थता गिरां न
च सामर्थ्यमपोहितं क्वचित्॥२७॥ उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः॥ इदमीदृ
गनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः॥२८॥ अवितृप्ततया तथापि मे हृदयं निर्णयमेव धा
वति॥ अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसंपदः॥२९॥ सहसा विदधीत न क्रियाम
विवेकः परमापदां पदं॥ वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः॥३०॥ अभिव

अनुसरति२ विशारदार्थं५ कर्तव्यार्थे४ कर्तव्यार्थे पुरु२ अवांतरभेदरूपमनः२ नानिशास्त्रं नहनः४
नश्येऽभिप्रायः२ अवसाययितुं२ रजांते१ विचार्य५ अस्तं२ अखंडुष्टतयाउ कश्चित्सुमानसो२ इदं वचनं४

संयतीते२ संप्रक्षनु२ कृत्यवत्साने२ शांतेः२ भूषण२ कार्यभ्यानापुरु५
साधयेति२ संप्रदायशुद्धः२ देवकृतानर्थोऽपि५ आच्छादिते दुर्विज्ञाने२ शांतेः२
संपादिता३ कार्यनाशः२

र्षति योऽनुपालयन्विधिबीजानि विवेकवारिणा॥ स सदा फलशालिनीं क्रियां शरदं लोक इ
वाधितिष्ठति॥३१॥ शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलंक्रिया॥ प्रशमाभरणं परा
क्रमः स नयापादितसिद्धिभूषणः॥३२॥ मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनां॥
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनं॥३३॥ स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्म
नि यच्छतां मनः॥ विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः॥३४॥ शिवमौपयिकं गरी
यसीं फलनिष्पत्तिमदूषितायतिं॥ विगणय्य नयंति पौरुषं विजितक्रोधरया जिगीषवः॥३५॥ अपने
यमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः॥ अविभिद्य निशाकृतं तमः प्रभया नांशुमताप्युदीय
ते॥३६॥ बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः॥ क्षयपक्ष इवैंदवीः कलाः सक
ला हंति स शक्तिसंपदः॥३७॥ समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मतां॥ अधितिष्ठति

अज्ञानं२ देवकारणं५ अपराधानां५ प्रापयंति४ मृदुत्वं१ तीक्ष्णतां१ पि२
अक्षता४ चतुरं वचनं उत्साहशाः२ मोहस्य२ नानगरनाशयति२ आक्रांतिं२ पुरुषकारं४ अनुकूले उपाये५
राज्ञा प्रथमं३

सुधनं२ बलेन१ प्राप्तं त्यक्त्वा२ पुंसः२ अधिकः३ भने कथा ३२ ऐश्वर्याणि वैः कृत३ विस्तारयन्नार२
कामक्रोधादीनानियमंति४ हत्वा२ उत्पादयंति४ आभुः४ उद्धृतिं४ समयपालः२ मू०२

लोकमौढसौसविघस्वानिवमेदिनीपतिः॥३८॥ क्षांतिरायपरिग्रहरुःश्रियाक्षचदुष्टेंद्रियवाजि
वश्यता॥ शरदभ्रचलाश्चलेंद्रियैरसुरक्ष्या हि बहुच्छलाः श्रियः॥३९॥ किमसामयिकं वितन्वता म
नसःक्षोभमुपात्तरंहसः॥ क्रियते पतिरुच्चकैरपां भवता धीरतयाधरीकृतः॥४०॥ श्रुतमप्य
धिगम्य ये रिपून्विनयंते न शरीरजन्मनः॥ जनयंत्यचिराय संपदामयशस्ते खलु चापलाश्र
यं॥४१॥ अतिपातितकालसाधना स्वशरीरेंद्रियवर्गतापिनी॥ जनवन्न भवंतमक्षमा
नयसिद्धेरपनेतुमर्हति॥४२॥ उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः॥ अनपायि
निबर्हणं द्विषां न तितिक्षासममस्ति साधनं॥४३॥ प्रणतिप्रवणान्विहाय नः सहजस्नेहनिबद्ध
चेतसः॥ प्रणमंति सदा सुयोधनं प्रथमे मानभृतां न वृष्णयः॥४४॥ सुहृदः सहजास्तथेतरे मत
मेषां न विलंघयंति ये॥ विनयादिव यापयंति ते धृतराष्ट्रात्मजमात्मसिद्धये॥४५॥ अभियोगइ

चिताशकं२ नजायितुं४ क्षांतिसज्जं२ स्थिरफलहेतुः४ उत्तरकालस्य४ कारणं४ बाधावाः२ प्रकृतस्य४ कृत्रिमस्नेहः२
यादवाः२ अतिक्रांतानिषिद्धयादीनि५ अग्रेसराः२ कालेगमिष्यंति२ प्राणामपरान्२ पितामाहबसाः२ वृष्णि२
अनुकूल्यादव१

(margin: नू०२ शार्याः४ ॥२॥ एतेषां१ पुरुषाः४ शांतिः५ ॥२॥ अकृत्रिमः२ सलग्नं२ यादवाः२ अभिमानः१)

जद्योगान्२ राजसमूहः२ संपदः४ करिष्यति२ मू०२ क्रोधस्य परागयुक्तः५ अपमानसहते२
वर्धयितुं४ वर्धयितुं४ महादवमानं४ कालः१ नेतृत्वानि२ अहंकरः४ उपसन्न१ उन्मूलितः५ नमुंचंति४

मान्महीभुजो भवता तस्य ततः कृतावधेः॥ प्रविघाटयिता समुत्पतन्हरिदश्वः कमलाकरानि
व॥४६॥ उपजापसहान्विलंघयन्स विधाता नृपतीननंतरान्॥ क्षमते न जनोप्यधःक्रियां कि
मुलोकाधिकधामराजकं॥४७॥ असमापितकृत्यसंपदां हतवेगं विनयेन तावता॥ प्रभवंत्यभि
मानशालिनां मदमुत्तंभयितुं विभूतयः॥४८॥ मदमानसमुद्धतं नृपं न वियुंक्ते नियमेन मूढ
ता॥ अतिमूढमुदस्यते नयान्नयहीनादपरज्यते जनः॥४९॥ अपरागसमीरणेरितः क्रमशी
र्णाकुलमूलसंततिः॥ सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि॥५०॥ अणुरप्युपहं
ति विग्रहः प्रभुमंतःप्रकृतिप्रकोपजः॥ अखिलं हि हिनस्ति भूधरं तरुशाखांतनिघर्षजोनलः॥५१॥
मतिमान्विनयप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः॥ सुजयः खलु तादृगंतरे विपदंताह्यविनी
तसंपदः॥५२॥ लघुवृत्तितया भिदां गतं बहिरंतश्च नृपस्य मंडलं॥ अभिभूय हरत्यनंतरः शि

विरोधः३ रिपुरितिशेषः१ अजितादिषु१ जेदः सहनशीलेन४ हन्तुं३ आक्रम्य२ अयं तनिघर्षितः२ दुर्जनस्य२
आत्मानोदिषुः२ विजयोभवति४ वृद्धिं२ मूलादुद्धर्तुं४ शत्रु२
दुर्नीतत्वात् ३

(margin: प्रतोद्धतः२ कारिणां४ सुलभा४ शिथिलाः२ स्वलेन२ अवरुद्ध दूषण५ युग्मं४)

थिलं कुलमिवापगा रयः ॥५३॥ अनुशासतमित्यथ मा कुलं नयवर्त्माकुलमर्जुनाग्रजं ॥ स्वयमं
र्थ इवाभिवांछितस्तमभीयाय पराशरात्मजः ॥५४॥ मधुरैरवशानि लंभयन्नपि तिर्यंचि शमं नि
रीक्षितैः ॥ परितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमं ॥५५॥ ॥ सहसोपगतः सवि
स्मयं तपसां सूतिरसूतिरेनसां ॥ ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसंचयः ॥५६॥
अथोच्चकैरासनतः परार्ध्यादुद्यन्स धूतारुणवल्कलाग्रः ॥ रराज कीर्णाकपिशांशुजालः शृंगात्सुमे
रोरिव घर्मरश्मिः ॥५७॥ अवहितहृदयो विधाय सोर्हामृषिवदृषिप्रवरे गुरूपदिष्टां ॥ तदनुम
तमलंचकार पश्चात्प्रशम इव श्रुतमासनं नरेंद्रः ॥५८॥ व्यक्तोदितस्मितमयूखविभासितो
ष्ठस्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः ॥ तन्वंतमिद्धमभितो गुरुमंशुजालं लक्ष्मीमुवाह सक
लस्य शशांकमूर्तेः ॥५९॥ छ ॥ ॥ इति श्रीकिरातार्जुनीये भारविकृतौ द्वैपायनागमनो नाम

चंद्रमसः १ अंशुमतः ४ दीप्तिमंतं २ प्रकटोदितैः ३ आभिमुखं २ शोभां वहति स्म २

॥ ८ ॥

द्वितीयः सर्गः ॥ २ ॥ श्री ॥ ॥ ततः शरच्चंद्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः ॥ बि
भ्राणमानीलरुचं पिशंगीर्जटास्तडित्वंतमिवांबुवाहं ॥१॥ प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षे
ण जनातिगेन ॥ प्रसह्य चेतस्सु समासजंतमसंस्तुतानामपि भावमार्द्रं ॥२॥ अनुद्धताकारत
या विविक्तां तन्वंतमंतःकरणस्य वृत्तिं ॥ माधुर्यविस्रंभविशेषभाजा कृतोपसंभाषमिवेक्षितेन ॥३॥
धर्मात्मजो धर्मनिबंधिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनां ॥ हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं
मुनिमाबभाषे ॥४॥ कलापकं ॥ ॥ अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री ॥ तुल्या
भवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतबलाहकायाः ॥५॥ अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः
संप्रति भूमिदेवाः ॥ आसंसृतेरस्मि जगत्सु जातस्त्वय्यागते यद्बहुमानपात्रं ॥६॥ श्रियं विकर्षत्य
पहंत्यघानि श्रेयः परिस्नौति तनोति कीर्तिं ॥ संदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न ध

॥ श्री ॥

दूरीकरोति १ आसीत् २ पुरुषार्थं स्रवति २ निर्गताः ३ अकृतः ४ अहं २ संग्रहो ४ दुर्लभा ४ फलप्रदाः ३ सफलीदानयोग्य २ श्रेयस्करी ४ किं न करोति आत्मयोनि २

कर्मणां५ स्वाविष्णाः१ उच्छ्वासं प्राप्नोति१ त्वदीयैः४ चेद्गमसि१ त्वाननेन२ सुखेन प्राप्तं१ सुखं२ उक्तं४ उचितं५ वैविध्यं२ सुप्रसन्नदृशा२ खिन्ने१ संग्रहानुरक्ततां४ अपेक्ष्य२

ने॥७॥ श्रोतुं न्म पूरवेपि हिमघुनौमे न निर्वृतं निर्वृतिमेति चक्षुः॥ समुच्छिन्नज्ञातिवियोगखेदं त्वत्संनिधावुद्यतीव चेतः॥८॥ निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निस्पृहाणां॥ तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति॥९॥ इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ॥ उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेंद्रः॥१०॥ चिचीषतां जन्मवतामलघ्वीं यशोवतंसामुभयत्र भूतिं॥ अभ्यर्हिता बंधुषु तुल्यरूपा वृत्तिर्विशेषेण तपोधनानां॥११॥ तथापि निघ्नं नृप तावकीनैः प्रह्वीकृतं मे हृदयं गुणौघैः॥ वीतस्पृहाणामपि मुक्तिभाजां भवंति भव्येषु हि पक्षपाताः॥१२॥ सुता न यूयं किमु तस्य राज्ञः सुयोधनं वा न गुणैरतीताः॥ यस्त्यक्तवान्वः स यथा बलाद्वा मोहं विधत्ते विषयाभिलाषः॥१३॥ जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः॥ असाधुयोगा हि जयांतरायाः प्रमाथिनीनां विपदां पदानि॥१४॥ पथश्च्युतायां समितौ रिपूणां ध

वदधास्वं वर्तते४ कामदानां२ आवर्जितं४ दुःखोत्पादकानां२ विरक्तानां४ संदेहप्राप्य२ सनाथाय२ सोद्भु
संसर्गाः१ विधाता१ व्यापारयतीत्यर्थः॥७ चेष्टापोसरार्थं२

आप्तं१ घत्ते१ स्वस्यैव नाशहेतुः२ अतिशयं३ आत्माधीनं४ कपटेन२ गरीयान्३ तयेत्यर्थः॥२ प्रकटीकृतं२ स्नेहः१ रोत्यादिषु१ लक्ष्यं ते२ नसाधुअनुष्ठितं१ प्रकर्षः२ उपायः३ यः२

र्म्यां दधानेन धुरं चिराय॥ त्वया विपत्स्वप्यविपत्तिरम्यमाविष्कृतं प्रेम परं गुणेषु॥१५॥ विधाय विध्वंसनमात्मनीनं शमैकवृत्तेर्भवतश्छलेन॥ प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते॥१६॥ लभ्या धरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः॥ अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतंत्रा हि रणे जयश्रीः॥१७॥ त्रिःसप्तकृत्वो जगतीपतीनां हंता गुरुर्यस्य स जामदग्न्यः॥ वीर्यावधूतः स्मतदा विवेद प्रकर्षमाधारवशं गुणानां॥१८॥ यस्मिन्ननैश्वर्यकृतव्यलीकः पराभवं प्राप्त इवांतकोपि॥ धुन्वं धनुः कस्य रणे न कुर्यान्मनो भयैकप्रवणं स भीष्मः॥१९॥ युग्मं॥ सृजंतमाजाविषुसंहतीर्वः सहेत कोपज्वलितं गुरुः कः॥ परिस्फुरल्लोलशिखाग्रजिह्वं जगज्जिघत्संतमिवांतवह्निं॥२०॥ निरीक्ष्य संरंभनिरस्तधैर्यं राधेयमाराधितजामदग्न्यं॥ असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्षपातः॥२१॥ यथा समासादितसाधनेन सुदुश्चरामाचरता तपस्यां॥ एते दुरापं समवाप्य वीर्यमु

समूहान्३ परिचयः२ आस्फालयन्सन्४ आर्त्तं१ क्रोधं३ कर्त्तुं३ निर्विकारत्वं उन्मुखत्वं४ अपरित्यक्तेषु२ असमर्थत्वं४ नाशयंतं३ धुंचंतं४ नवहं२
१ पाशुपतास्त्ररूपेणैवंविधेन१ दैवी अपेक्षितं पं२

म्मलितारः कपिकेतनेन ॥२२॥ महत्त्वयोगाय महत्महिम्नामाराधिनीं तां नृपदेवतानां ॥ दा
तुं प्रदानोचितभूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्यां ॥२३॥ युग्मं ॥ इत्यब्रुवंतं तमुवाच स धर्ययेति
प्रमाणयन्वाक्यमजातशत्रोः ॥ प्रसेदिवांसं तमुपाससाद वसन्निवांते विनयेन जिष्णुः ॥२४॥ निर्या
य विद्याथ दिनादिरम्यात् बिंबादिवार्कस्य मुखान्महर्षेः ॥ पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्प
द्ममिवाभिपेदे ॥२५॥ योगं च तं योग्यतमाय तस्मै तपःप्रभावाद्वितताः स घः ॥ येनास्य तत्त्वेषु कृतेव
वभासे समुन्मिमीलेव चिराय चक्षुः ॥२६॥ आकारमाशंसितभूरिलाभं दधानमंतःकरणानुरू
पं ॥ नियोक्ष्यति त्वयि पुण्यदृष्टिं तपःसमाधौ मुनिरित्युवाच ॥२७॥ अनेन योगेन विवृद्धतेजा
निजां परस्मै पदवीमयच्छन् ॥ समाचराचारमुपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनां ॥२८॥ क
रिष्यसे यत्र सुदुश्चराणि प्रसत्तये गोत्रभिदस्तपांसि ॥ शिलोच्चयं चारुशिलोच्चयं तमेष क्षणा

न्नेष्यति गुह्यकस्त्वां ॥२९॥ इति ब्रुवाणेन महेंद्रसूनुं महर्षिणा तेन तिरोबभूवे ॥ तं राजराजानुचरोस्य सा
क्षात्प्रदेशमादेशमिवाधितस्थौ ॥३०॥ कृतानतिर्व्याहृतसांत्ववादे जातस्पृहः पुण्यजनः स जिष्णौ ॥
इयाय सख्याविव संप्रसादं विश्वासयत्याशु सतां हि योगः ॥३१॥ अथोष्णभासेव सुमेरुकुंजान्विही
यमानान्मुदया ययतेन ॥ वहत्युनीनुः ख कृतात्मलीनं तमः शनैः पांडुसुतान्प्रपेदे ॥३२॥ असंशयालो
चितकार्यनुन्नः प्रेम्णा समानीय विभज्यमानः ॥ तुल्याद्विभागादिव तन्मनोभिर्दुःखातिभारोपि लघुः
स मेने ॥३३॥ धैर्येण विश्वास्यतया महर्षेस्तीव्रादरातिप्रभवाच्च मन्योः ॥ वीर्यं च विद्वत्सु सुते मघोनः
स तेषु न स्थानमवाप शोकः ॥३४॥ ताञ्भूरिधाम्नश्चतुरोपि दूरं विहाय यामानिव वासरस्य ॥ एकौघ
भूतं तदशर्म कृष्णां विभावरीं ध्वांतमिवाभिपेदे ॥३५॥ तुषारलेखाकुलितोत्पलाभे पर्यश्रुणी मंगल
भंगभीरुः ॥ अगूढभावापि विलोकने सा न लोचने मीलयितुं विषेहे ॥३६॥ अकृत्रिमप्रेमरसाभिरामं
रामार्पितं दृष्टिविलोभि दृष्टं ॥ मनःप्रसादांजलिनानिकामं जग्राह पाथेयमिवेंद्रसूनुः ॥३७॥ धैर्या

वसारेनहेतेप्रसादात्वन्यादिपेनेवनिद्राघासिंदुपुः॥ निराकृबाष्पोदयसंततंकं समुवाचकृष्णादि
तिराजपुत्री॥३८॥ मन्नोद्विषन्मनिपंकल्तेतेसंभावनीकृतिमिवोध्दरिष्यन्॥ ओधिद्विषामातप
सांप्रसिद्धेरस्मद्विनीमात्तथामुन्मनीनः॥३९॥ यशोधिगंतुंसुखलिप्सयावामनुष्यसंख्यामतिवर्ति
तुंवा॥ नेनुत्सुकानामभियोगभाजांसमुत्सुकेवांकमुपैतिसिद्धिः॥४०॥ लोकंविधात्राविहितस्य
गोप्तुंक्षत्रस्यमुष्णन्वसुजैत्रमोजः॥ तेजस्विनायाविजयैकवृत्तेर्निघ्नन्प्रियंप्राणमिवाभिमानं॥
॥४१॥ व्रीडानतैराप्तजनोपनीतःसंशय्यकृछ्रेणनृपैःप्रपन्नः॥ वितानवन्तंविततंपृथिव्यांयशःस
मूहन्निवदिग्विकीर्णं॥४२॥ वीर्यावदानेषुकृतावमर्षस्तन्वन्नभूतामिवसंप्रतीतिं॥ कुर्वन्प्रकाम
क्षमयामितानामकौशलंपापकृत्वावशेषैः॥४३॥ प्रसह्ययोस्मासुपरैःप्रयुक्तोवक्तुंनशक्यःकिमुता
भिकर्तुं॥ नवीकरिष्यत्युपशुष्यदार्द्रःसत्वद्विनामेहृदयंनिकारः॥४४॥ प्राप्तोभिमानव्यसनाद

स्पष्टंहतीवदंतव्यसनोद्धिकारं॥ द्विषन्निनावांतरितोरुतेजाः शारदघनाकीर्णइवादिरहः॥४५॥
सख्योऽसमंदैरिवनिष्क्रियत्वान्नात्यर्थमस्त्रैरवसीदतस्ते॥ प्रयासःस्यात्क्षीणजलार्णवाभत्वम
न्यमाकारमिवाभिपन्नं॥४६॥ दुःशासनामर्षरजोविकीर्णैरेभिर्विनाथैरिवभाग्यनाथैः॥ के
शैःकदर्थीकृतवीर्यसारैःकच्चित्सएवासिधनंजयस्त्वं॥४७॥ सक्षात्रियस्त्राणसहःसतांयस्तत्का
र्मुकंकर्मसुयस्यशक्तिः॥ वहन्द्वयीमप्यफलेर्थजातेकरोत्यसंस्कारहतामिवोक्तिं॥४८॥ वीतौजसः
सन्निधिमात्रशेषाभवत्कृतांभूतिमपेक्षमाणाः॥ समानदुःखाइवनस्त्वदीयाःसरूपतांपार्थगु
णाभजंते॥४९॥ आक्षिप्यमाणंरिपुभिःप्रमादान्नागैरिवालूनसटंमृगेन्द्रं॥ त्वांधूरियंयोग्यतनु
याभिरूढादरीभ्यादिनश्रीरिवधर्मरश्मिं॥५०॥ करोतियःशेषजनातिरिक्तांसंभावनामर्थवतीक्रि
याभिः॥ संसत्सुजातेपुरुषाधिकारेनपूरणीतंसमुपैतिसंख्या॥५१॥ प्रियेषुयैःपार्थविनोपपन्नै
र्विचिंत्यमानैःक्षणमप्यमेतिचेतः॥ तवप्रयातस्यजपायतेषांक्रियोदयानामघवाविघातं॥५२॥ मा

कि॰ सप्तानीकुर्वती २ सीयमानेन २ प्रस्वेदोद्भवेन ४ बालातपेवर्षि ३ स्पर्श क्षिप्ता लोचनकान्त्या ४ रूनकत्सवेष ५ ४
फणि कराली कृत्य ५

ततो मिलितं शिथिलत्वमायतीशनैः शनैः शान्तरयेण वारिणा ॥ निरीक्ष्य रेमे स समुद्रयोषितां तरंगितं क्षौमविपांडु सैकतं ॥ ६ ॥ मनोरमं प्रीपितमंतरं भ्रुवोरलंकृतं केसररेणुनाणुना ॥ अलक्तताम्राधरपल्लवश्रिया समानयंतीमिव बंधुजीवकं ॥ ७ ॥ नवातपालोहितमाहितं मुहुर्महानिवेशौ परिनःपयोधरौ ॥ चकासयंतीमरविंदजं रजः परिश्रमांभःपुलके नसर्पिनी ॥ ८ ॥ कपोलसंश्लेषि विलोचनत्विषा विभूषयंतीमवतंसकोत्पलं ॥ सुतेन पांडोः कलमस्य गोपिकां विलोक्य मेने शरदः कृतार्थता ॥ ९ ॥ उपारताः पश्चिमरात्रिगोचरादपारयंतः पतितुं जवेन गां ॥ तमुत्सुकाश्चक्रुरवेक्षणोत्सुकं गवां गणाः प्रस्नुतपीवरौधसः ॥ १० ॥ परीतमुक्षावजये जयश्रिया नदंतमुच्चैः क्षततसिंधुरोधसं ॥ ददर्श पुष्टिं दधतं स शारदीं सविग्रहं दर्पमिवाधिपं गवां ॥ ११ ॥ विमुच्यमानैरपि तस्य मंथरं गवां हिमानीविशदैः कदंबकैः ॥ शरन्नदीनां पुलिनैः कुतूहलं गलद्दुकूलैर्जघनैरिवादधे ॥ १२ ॥ गतान्पशूनां सहजन्मबंधुतां गृहाश्रयं प्रेम
॥ १२ ॥ ॥ १२ ॥
नियन्त्रणा ४ दृष्ट्वितनिमांसलानि २ वृषभं २ असकृन्तं ४ धावितुं ४ चक्रे १ नदं २ वत्सपुलकोत्थिताः ४ मुखैः २ वृषस्कंधराणां ५
अलंकारमिव १ हलकृष्ट नाव्या नवनीतं ४ वृषभाणां परागवेष्टिन ३ पतितं न धोःतरंपेन ३

अनुविद्धः ३ मंथराणां ५ शब्दः ५ गोष्ठप्रांगणेषु ४ उपलक्षिताः २ प्रीतिः १ शोभितानि २ तुल्यै १ स्फुटं २ केशाः २ कामानि मेरधुरस्य
कंपितेषु ५ भ्रमतोः ५ पाणोः विक्षेपेन मनोहरैः ४ स्थिताः ३ मेघस्य ४ विकसितानि ३ चंचलाः ५ संवलितनितंबाः ३ गुणाकृष्टौ ३
मधुराणां ४ उन्मार्जितकूर्चं ३

वनेषु विन्यस्तः ॥ ददर्श गोपानुपधेनु पांडवः कृतानुकारानिव गोभिरार्जवे ॥ परिभ्रमन्मूर्धजषट्पदाकुलैः स्मितोदयादर्शितदंतकेसरैः ॥ मुखैश्चलत्कुंडलरश्मिरंजितैर्नवातपामृष्टसरोजचारुभिः ॥ १४ ॥ निबद्धनिःश्वासविकंपिताधरा लता इव प्रस्फुरितैकपल्लवाः ॥ व्यपोढपार्श्वैरपवर्तितत्रिका विकर्षणैः पाणिविहारहारिभिः ॥ १५ ॥ व्रजाजिरेष्वंबुदनादशंकिनीः शिखंडिनामुन्मदयत्सु योषितः ॥ मुहुःप्रणुन्नेषु मथां विवर्तनैर्नदत्सु कुंभेषु मृदंगमंथरं ॥ १६ ॥ स मंथरावल्गितपीवरस्तनीः परिश्रमक्लांतविलोचनोत्पलाः ॥ निरीक्षितुं नोपरराम वल्लवीरभिप्रनृत्ता इव वारयोषितः ॥ १७ ॥ ॥ कपोलैः के ॥ पपातपूर्वां जहतो विजिह्मतां वृषोपभुक्तांतिकसस्यसंपदः ॥ रथांगसीमंतितसांद्रकर्दमान्प्रसक्तसंपातपृथक्कृतान्पथः ॥ १८ ॥ जनैरुपग्राममनिंघकर्मभिर्विविक्तभावेंगितभूषणैर्वृताः ॥ भृशं ददर्शाश्रममंडपोपमाः सपुष्पहासाः स निवेशवीरुधः ॥ १९ ॥ ततः स संप्रेक्ष्य शरद्गुणश्रियं शरद्गुणा

जगाम ३ वर्षासंमंथिनी ३ विलोकयितुं ४ नविरराम ४ गोपाङ्गनाः ४ म हलर्त्वाद्भिः रथांगचक्रैः निविडाः २ अधिष्ठिताः २ संततानाः ३ सञ्चाराः ३
श्रियः २ त्यजतः ३ वक्रतां ३ वृषभैः २ निकटस्य २ एकार्थानि २ निष्पाद्य वेष्टितं २
पुष्पविकासैः सहिताः २ ... २ ... २

14

कि०

समुत्पतितुमिच्छतः३ पल्लवः१ निबिडैः१ शकलैः१ फूत्कारैः४ शोणः४ सकाशात्२ दंतिकरिणः२
अतिचः श्रमः५ उच्छलितैः३ आघ्राय२ आतिवेगयुक्तैः४ सलीलाः५ दृष्ट्वा३
प्रेरितं४ आघ्राय संगतः सन्१ उपस्थिताः२ स्थिताः५

शुचिरप्सु विद्रुमलताविटपस्तनुसांद्रफेनलवसंवलितः। स्मरदायिनः स्मरयति स्म भृशं दयिता-
धरस्य दशनाभिहतः॥१३॥ उपलाहतोच्चलतरंग[illegible]तं मदगंधमुत्थितवतां पयसः। प्रतिदंति-
नामिव स संबुबुधे करियादसामभिमुखान्करिणः॥१४॥ स जगाम विस्मयमुदीक्ष्य पुरः सहसा
समुत्पिपतिषोः फणिनः। प्रहितं दिवि प्रजविभिः श्वसितैः शरदभ्रविभ्रममपां पटलं॥१५॥ स
ततार सैकतवतीरभितः शफरीपरिस्फुरितचारुदृशः। ललिताः सखीरिव बृहज्जघनाः सुर-
निम्नगामुपयतीः सरितः॥१६॥ अधिरुह्य पुष्पभरनम्रशिखैः परितः परिष्कृततलां तरुभिः।
मनसः प्रसत्तिमिव मूर्ध्नि गिरेः शुचिमाससाद स वनांतभुवं॥१७॥ अनुसानु पुष्पितलताविति-
तिः फलितोरुभूरुहविविक्तवनः। धृतिमाततान तनयस्य हरेस्तपसेऽधिवस्तुमचलामचलः॥
॥१८॥ प्रणिधाय तत्र विधिनाथ धियं दधतः पुरातनमुनेर्मुनितां। श्रममादधावसुकरं न तपः

मनसः प्रसादं३ तततिः४ फलितानि२ गिरेः४ अर्जुनस्य२ अग्राणि४ अकृतं स्वरूपं४ संतनयोः३
निर्वाणस्थितां३ नियम्य२ अर्जुनस्य२ तपश्चर्यार्थं अधिष्ठातुं२ न चकार१

॥२०॥ स०६ ॥२०॥

प्रतिकूलं किं अस्ति१ सोपद्रवं३ चंद्रवत्१ मुख्यं१ पुष्पाणि४ बजार४ ध्यानेन२
चित्तवृत्तिं२ सेवमानः४ रतिं३ ४ नैसर्गिकः स्नानेन५
पवित्रः४

किमिवावसादकरमात्मवतां॥१९॥ शमयन्धृतेंद्रियशमैकसुखः शुचिभिर्गुणैरघमयं स तमः।
प्रतिवासरं सुकृतिभिर्ववृधे विमलः कलाभिरिव शीतरुचिः॥२०॥ अधरीचकार च विवेकगुणादगु-
णेषु तस्य धियमस्तवतः। प्रतिघातिनीं विषयसंगरुचिं निरुपप्लवः शमसुखानुभवः॥२१॥ मनसा ज-
पैः प्रणतिभिः प्रयतः समुपेयिवानधिपतिं स दिवः। सहजेतरौ जयशमौ दधती बिभराम्बभूव यु-
गपन्महसी॥२२॥ शिरसा हरिन्मणिनिभः स वहन्कृतजन्मनोऽभिषवणेन जटाः। उपमां ययावरुण-
दीधितिभिः परिमृष्टमूर्धनि तमालतरोः॥२३॥ धृतहेतिरप्यधृतजिह्ममतिश्चरितैर्मुनीनधरयन्शु-
चिभिः। रजयांचकार विरजाः स मृगान्कमिवेशते रमयितुं न गुणाः॥२४॥ अनुकूलपातिन-
मचंडगतिं किरता सुगंधिमभितः पवनं। अवधीरितार्तवगुणं सुखतां नयता रुचां निचयमंशुम-
ता॥२५॥ नवपल्लवांजलिभृतः प्रचये बृहतस्तरून्गमयतावनतिं। स्तृणता तृणैः प्रतिनिशं मृदु-

रमयामास३ व्याप्तं४ रजोगुणरहितः३ तिरस्कृतः२ आयुधानि४ वसावर्ते३ प्रापयता२ अधः कुर्वन्सन्४
प्रवर्तयता२ पुष्पाणां छेदने प्रापयता२ न समर्था भवंति३ आच्छादयता२ अनुकूलं वहति३

वि.

शायनस्थानुकृतां२ असतं२ सेवया२ अनुगृहीतः२ जितेन्द्रियाणां२ विद्युतानि२ अंगीकृताः४
शांततामुपयती१ वनेचराः५ ज्ञात्वा४ गताः२ कृताः५ प्रापुः४ शैलरक्षाणस्य५ अनुष्ठाने५ स६

त्रिः शमनीयतामुपयतीव वसुधां॥२६॥ पतितैरपेतजलदान्नभसः पृषतैरपां शमयता च रजः॥
स दयालुनेव परिगाढकृशः परिचर्ययानुजगृहे तपसा॥२७॥ ॥विशेषकं॥ ॥महते फलाय तद
वेक्ष्य शिवं विकसन्निमित्तकुसुमं स पुरः॥ न जगाम विस्मयवशं वशिनां न हि हंति धैर्यमनुभाव
गुणाः॥२८॥ तद्भूरिवासरकृतं सुकृतैरुपलभ्य वैभवमनन्यभवं॥ उपतस्थुरास्थितविषादधियः
शतयज्वनो वनचरा वसतिं॥२९॥ विदिताः प्रविश्य विहितानतयः शिथिलीकृतेऽधिकृतकृत्यवि
धौ॥ अनपेतकालमभिरामकथाः कथयांबभूवुरिति गोत्रभिदे॥३०॥ शुचिवल्कवीततनुरन्य ॥२२॥
तमस्तिमिरच्छिदामिव गिरौ भवतः॥ महते जयाय मघवन्ननघः पुरुषस्तपस्यति तपञ्जगतीं॥३१॥
स बिभर्ति भीषणभुजंगभुजः पृथुविद्विषां भयविधायि धनुः॥ अमलेन तस्य धृतसच्चरिताश्च
रितेन चातिशयिता मुनयः॥३२॥ मरुतः शिवा नवतृणा जगती विमलं नभो रजसि वृष्टिरपां॥

अनतिक्रांतकालं यथा स्यात्तथा४ मर्यादानां२ जयंकरं२ ज्ञाता२ ज्ञानं२ नाशयन्सन्२ आच्छादितां४
लघुकृताः१ अनुकूला वतिः१ सर्वतो१ द्वितीयवर्षविश्वितः४

॥२२॥

विचार्य५ अनुकूलतां प्रापितः१ शोभितोपि२ परिचर्या१ पुष्पावचये२ अन्योन्येषां अद्रोहेण१ महदंतःसारं२ कथितुं४
शिष्यादयः२ कथयतीव३ अपूर्वदर्शने३ सर्थीनोवर्ततो२ प्रभावसंप्रापकं२ नसमर्थाः४ अयोग्यं वचनं५
तपोरूपं५

गुणसंपदानुगुणतां गमितः कुरुतेस्य भक्तिमिव भूतगणः॥३३॥ इतरेतरानभिभवेन मृगास्तमुपा
सते गुरुमिवांतसदः॥ विनमंति चास्य तरवः प्रचये परवान्स तेन भवतेव नगः॥३४॥ उरु सत्त्वमाह वि
परिश्रमता परमं वपुः प्रथयतीव जयं॥ शमिनोपि तस्य नवसंगमने विभुतानुषंगि भयमेति जनः॥३५॥
ऋषिवंशजः स यदि दैत्यकुले यदि वान्वये महति भूमिभृतां॥ चरतस्तपस्तव वनेषु सदा न वयं निरूपयि मिरू४
तुमस्य गतिं॥३६॥ विगणय्य कारणमनेकगुणं निजयाथवा कथितमल्पतया॥ असदप्यदः सहितु
मर्हसि नः क्व वनेचराः क्व निपुणा मतयः॥३७॥ उपलभ्य गुह्यकगणादिति तन्मनसः प्रियं प्रि
यसुतस्य तपः॥ निजुगोप हर्षमुदितं मघवा नयवर्त्मगाः प्रभवतां हि धियः॥३८॥ प्रणिधाय चित्त
मथ भक्ततया विदितेप्यपूर्व इव तत्र हरिः॥ उपलब्धुमस्य नियमस्थिरतां सुरसुंदरीरिति वचोभि
दधे॥३९॥ सुकुमारमेकमणु मर्मभिदामतिदूरगं युतममोघतया॥ अविपक्षमस्त्रमपरं कतमं अस्ति१

आज्ञापयेदिति स्म३ परीक्षितुं१ ज्ञात्वा४ प्रज्ञाणां३ अवस्थाप्य२ उक्तवान्२
अविदितवत्२ अर्जुने२ अस्त्राणां मध्ये१ युक्तं सफलतया१

(17)

कि॰

नागसंभवैः५ दीप्यमानैः२ धर्मस्य४ संपादयामास१ श्रमजलं१ मंडनं२ अवगता४ आक्षिप्तं३ नानीयेषु४ कार्येषु५
निकषपाषाणरेखा तद्वत् रुचिरैः३ मध्यबंधनच्छिन्नैः५ अतिशयेन३
नाडीच्छिन्नैः५ प्राप्तः४ प्राप्ता२

स॰२

क्रोपुते च्छेतिलके पु मौक्तिकाकुलाः संपेदे श्रमजलैः सलिलोद्गमो विभूषां रम्याणां विकृतिरपि श्रियं तनोति ॥५॥ रात्रिंदिवं पथि मरुतामक्लिन्नरूपैरुल्काचिस्फुरद्गतिभिर्ध्रियमाणकानां ॥ तेजोभिः कनकनिकाषराजिगौरैरायामः क्रियत इव स्म सातिरेकः ॥६॥ रामाणामवजितमाल्यसौकुमार्ये संप्राप्ते वपुषि सहत्वमातपस्य ॥ गंधर्वैरधिगगनं प्रयोगवीणां स्वेदार्द्रैः कल्याणीविधिषु विनिचयनां विधातुं ॥ सिंदूरैः कृतरुचयः सहेमकक्ष्याः स्रोतोभिस्त्रिदशगजा मदं क्षरंतः ॥ सादृश्यं ययुरुरुणांशुरागभिन्नैर्वर्षद्भिः स्फुरिततडिल्लतैः पयोदैः ॥८॥ अत्यर्थं दुरुपसदादुपेत्य दूरं पर्यंता दहिममयूखमंडलस्य ॥ आशानामुपरि चितानिर्वैककवेणीरम्भोभिस्त्रिदशगजानदीपधूर्वलीनि ॥९॥

॥२३॥

आमत्तभ्रमरकुलाकुलानि धुन्वन्नुद्धूतग्रथितरजांसि पंकजानि ॥ कांतानां गगननदीतरंगशीतः संतापं विरमयति स्म मातरिश्वा ॥१०॥ संछिन्नैरिव तुरगावगाहनेन प्राप्यौवरत्नुपदवीविमा

रूपमंडलस्य प्रांता३ मिश्रितैः४ अंतरिक्षस्य१ गुफितानि३ छिन्नानि३ आलोडनं१ प्राप्य४ त्रिदशावनितानां सेनया३
शमयामास१ वायुः१ मार्गः१

॥२३॥

गलितानि३ वक्रे१ पातिताः२ चक्रिरे३ अप्रतिघातं यथा२ भूमागां१ प्रासं२ उल्लंघ्य वंतः३
आसक्तानां४ पाठं कुर्वत्स्वपि दंतैः३ पुरुषेषु४ नेमिच्छिन्नैः२ आनंदं३

नपंक्तीः ॥ तत्पूर्वं प्रतिविदधे सुरापगायाः श्रांतस्खलनविवर्तनं पयोभिः ॥११॥ कांतानां गुह्यचरितानि सयोरथ्यानामक्षाग्रक्षतनुरवेश्मवेदिकानां ॥ निःसंगं प्रधिभिरुपर्युदंतिदंतैः संपादश्चिन्नितं जलेषु तोयदेषु ॥१२॥ तप्तानामुपदधिरे विषाणभिन्नाः प्रह्लादं सुरकरिणां घनाः क्षरंतः ॥ युक्तानां खलु महतां परोपकारे कल्याणीं भवति रुजत्स्वपि प्रवृत्तिः ॥१३॥ संप्राप्तानामुद्धरश्मिकेन तान्यमाने दिव्यस्त्रीजघनवरांशुके विवृत्तिं ॥ पर्यस्यत्स्पृथुमणिमेखलांशुजालं संजज्ञे युतकमिवांतरीयमूर्वोः ॥१४॥ प्रत्यासन्नतिलकफारपारपातैः प्रह्लादं शमितपरिश्रमादिशंतैः ॥ कांतानां बहुमतिमाययुः पयोदैर्नाल्पीयान्बहुसुकृतं हिनस्ति दोषः ॥१५॥ यातस्य ग्रथिततरंगसैकताके विच्छेदं विपयसि वारिवाहजाले ॥ आतेनुश्चिरदशवधूजनोगनाङ्गसंवानं सुरिपनुषः प्रजामणीनां ॥१६॥ संसिद्धाविति करणीयसंनिबद्धैरालापैः पिपतिषतां विलंघ्य वीथिं ॥ आ

मध्यं४ त्रुटितं२ मेघैः सम्यक् ह२ विस्तारयामासुः२ पक्षिणां मार्गं१ असंलग्नत्वं२ उत्तीर्य१ अधोंऽशुभूमिव५
बाहुल्येन३ संन्मानं२ प्रारब्धकार्यसिद्धौ१ उपकार३ मार्गविदैः४ वर्तमानस्य३ बभूव५ रदतः४

सं०
प्रचार १ शुश्रुषते ३ असंकुचिताभिः २ सेनयाः ३ आच्छादिताः २ जंजरं यथार्थ २ गच्छंतीसति २ आपयामास ३ आरूढाः ३
आकुंचिताः प्रोथाः ४ नष्टेन ४ उच्चैस्तानिः २ छंदेः ३ आदरात् ३ मत्ताः गजाः ४ पार्श्वे पोः ४
पालितवंसति ३ उदकविषये ५ स्वर नघान्४ तः २ प्राप्तुः ५

सं०७

सं देशो देत्रानलोचनं घूडितन्याः भ्रूमुनेः प्रविहितं सानुरिह कालः॥१७॥आकीर्णा मुखनलिनैर्विलासिनीनामुद्भूतस्फुटविशदातपत्रफेना॥सातूर्यध्वनिरवतारमाप्यमाना तीरक्षत्रनुः स्मितरसितं जानदीव रेजे॥१८॥सेतुत्वं दधति पयोमुचां वितानैः संरंभादभिपततोरथानुवेन॥आतिन्युर्नियमित रश्मिकृग्नघोणाः कृच्छ्रेण क्षितिमवनामिनस्तुरंगाः॥१९॥नाहेदं न गजभासितः करेणु वर्याः पर्यन्तस्थितजलदादिवः पतनः॥सा दृष्यं निलयननिःप्रकंपपक्षैराक्रम्य भुर्त्तेलनिधिशाप्यस्त्रिर्नगेन्द्रैः॥२०॥
ऽत्सग्नैस्तमभिविषमेसमं हि मार्दः कांतानामिव पदन्यिपातलाघवेन॥आमूलादुपनदि सैकतेषु लेनेसाम ग्रंगवुरपदवीतुरंगमाणां॥२१॥संध्यानैर्निपतितनिर्झरासु मंद्रैः संमूर्छ्य निनदैः॥२४॥ रघिस्यकासु॥उत्फ्रावैर्घनरवशंकया मयूरैः सोत्कंठं ध्वनिरुपशुश्रुवेरथानां॥२२॥संक्लिन्नामविरलपातिन्निर्मयूखैर्नरलीना नृशमुपमेखलं मणीनां॥विच्छिन्नामिव वनिता नजो नतराळे
नम्येी४
॥२४॥
मूर्छि ४ संपर्णता ३ श्रेणी २ गछता ४ सत्छंयथा २ संचारस्य ४ गंभीरैः यथा ३ निर्दि प्रतिध्वानेः ३
ऊर्ध्वनिषु २ निरंतरप्रसारितैः १ एकरूप ४ सरा यथा २ वर्द्धमानः २ युक्ता २

कदोदकधारा १ ददृशुः २ आरूढ २ सानिरूढा २ मार्गा १ इछाचक्रुः २ अछिसाक्षीत्योः २ पत्राणां १
व्याप्तं ५ सकपर्द यथा २ सविवाः ५ योग्यं ४ सांद्राः ५ व्यापः ३ पुष्पफलप्रधानानिज्ञालीरत्यानि २ ग्रीष्मांते प्रावट्काळे २
=आऽजनयामास ५ घनिविडं २ अवैराग्य १

वैश्यांजस्फूतिमवलोकयांबभूवुः॥२३॥आसन्नं द्विपपदवीमदानिलानामुध्येतोधियमवमस्य भूंगितानां॥सेव्यान्नं निजककाशितोल्लिसन्ने रितेनाः प्रस्थानं सुरकरिणः कथंचिदापुः॥२४॥नीरंध्रं पथिषु रजोरथांगधूतं पर्यस्यन्नवसलिलारुणं वहंती॥आतेनेवनगहनानिवाहिनी साघर्मात्तरक्तजितेन्द्र ळेव जहुकन्या॥२५॥संभोगक्षममुगहनामथोपगंगं विभ्राणं ज्वलितमणीनि सैकतानि॥अध्यूष्यातकुंभु मार्चितं सहायं रत्नारे रविरलशाद्वलां धरित्रीं॥२६॥भूमनुः समधिकमादधे नरेन्द्राः श्रीमत्ताहरिसखवाहिनी निवेशाः॥संसक्तौ किमसुलभं महोदयानामुछ्रायं नयति यदृच्छयापि योगः॥२७॥सामोदाः कुसुमतरुश्रियो विविक्ताः संपत्तिः किसलयशालिनीलतानां॥साफल्यं ययुरमराङ्गनोपभुक्ताः सा लक्ष्मीरुपकुरुते यथा परेषां॥२८॥क्लांतोपि त्रिदशवधूजनः पुरस्तालीनाहिरवसितं विलोलपल्लवानां॥सेव्यानां हतविनयैरिवावृतानां संपर्कं परिहरतिस्म
सुंदरतां ४ =एते पदार्थाः २ =यासः =४ =सम्यक् परिचर्या सत्यां ४ =महालतां ४ =पल्लवैः २ =उत्कर्ष प्रयाति ४ =दैवात्
=उपकारि २ एकांतप्रदेशाः ३ =दृष्टैः १ =आंतोपि २ अग्रतः १ =त्यजति स्म २
वेष्टितानां २

कि०

नगणपति रूप५ उन्नामिताः धृताः सर्वे कंबलाश्च ह नु॰ भूभुग्भिः२ गजशिक्षा यंतृभिः१ स नपंथा५ उद्धृतानि२ उत्सुकाः२ गजस्यापस्थाने२ आनीतानि२ उपविष्टः२ उत्थानेन कुलितं२ क्षिप्तवान्२ सक्तैः२ हस्तीपकं
हस्तीपकात्५ गमनेन

वंदनानां॥२९॥ उत्सृष्टध्वजकुथकंकणा धरित्रीमानीता विदितनयैः श्रमं विनेतुं॥ आक्षिप्तद्रुमगह
नायुगांतवातैः पर्यस्ता गिरय इवाद्विपा विरेजुः॥३०॥ प्रस्थानश्रमजनितां विहाय निद्रामामुक्ते गजप
तिना सदानपंके॥ शय्यांते कुलमलिनां क्षणं विलीनैः संलेभे रुचितमिव श्रृंखलं चकाशे॥३१॥ आ
यस्तः सुरसरिदोघरुद्धवर्त्मा संप्राप्तुं वनगजदानगंधिरोधः॥ मूर्धानं निहितशितांकुशं विधुन्वन्यं
तारं न विगणयांचकार नागः॥३२॥ आरोढुः समवनतस्य पीतशेषे साशंके पयसि समीरिते करे
ण॥ संमार्जन्नरुणमदस्रुती कपोलौ सस्यंदे मद इव शीकरः करेणोः॥३३॥ आघ्राय क्षणमतितृ
ष्यतापि रोषादुत्तीरं निहितविवृत्तलोचनेन॥ संपृक्तं वनकरिणां मदांबुसेकैर्नाचेमे हिममपि वारि
वारणेन॥३४॥ प्रश्च्योतन्मदसुरभीणि निम्नगायाः क्रीडंतो गजपतयः पयांसि कृत्वा॥ किंजल्क्य
वहितताम्रदानलेखैरुत्तेरुः सरसिजगंधिभिः कपोलैः॥३५॥ नीतं नोन्मथितसरोजरेणुपिंगं कै

आच्छादिताः२ नीरे३ निक्षिप्तः२ सुगंधीनि२ भवंते४ पर्वकायै५ मदधाराभिः२ शीलकमपि न पीतं२
निर्गताः२

॥२५॥ ॥२५॥ कंपयन्५ खुंडेन५

कि०

निबिडं२ सेनाक्षोभैः१ संकुचितौ पश्चिमपदाग्रौ२ उत्पादितानि च२ संप्रापे२ प्रमथ्य नि२ स२
जलश्राविताः२ चंचलाभ्य२ तिरस्कृतः४ सांगविक्षेपं यथा२ तत्संबंधिनं३
नादिभिः२

र्कीर्णं बलरजसा घनारुणेन क्षोभैः सपदि तरंगितं नटेषु॥ मातंगोन्मथितसरोजरेणुपिंगं कौशेय
वसनमिवांबु निर्बभासे॥३६॥ आमंद्रैर्नियमितकंवरपिधानैः ससक्तैरगुरुतवनेषु सांगहारं॥ संपेदे श्र
सितमदांबुभिर्गजेंद्रैः प्रस्यंदि प्रचलितगंडशैलशोभा॥३७॥ निःशेषप्रशमितरेणुवारणानां स्रोतोभि
र्मदजलमुत्सृजतामजस्रं॥ आमोदं व्यवहितभूरिपुष्पगंधं भिन्नैलासुरभिमुवाह गंधवाहः॥३८॥ सा
दश्रयंद्धतिगर्जितमेघघोषे रुन्निद्रस्फुरितमृगाधिपश्रुतानि॥ आतेनुश्चकितचकोरनीलकंठान्क
च्छांतानमरमहेभबृंहितानि॥३९॥ शाखावसक्तकमनीयपरिच्छदानामध्वश्रमातुरवधूजनसेविता
नां॥ जज्ञे निवेशनविभागपरिष्कृतानां लक्ष्मीः पुरोपवनजा वनपादपानां॥४०॥ ॥श्री॥ ॥इति श्रीकि
राताऽर्जुनीये महाकाव्ये लक्ष्म्यंके भारविकृतौ सुरांगनाप्रस्थानो नाम सप्तमः सर्गः॥ ॥७॥ ॥श्री॥
अथ स्वमायाकृतमंदिरोज्ज्वलं ज्वलन्मणि व्योमसदां सनातनं॥ सुरांगना गोपतिचापगोपुरं पुरं व

आवासनिकरस्थानानां२ गर्जितानि४ प्रबुद्धा५ आकर्णितानि५ हर्षपुलकाश्च कुः२ शीलाश्च५ जलप्रापदराः५
गंधर्वाणां२ अलंकृतानां२ आरोपिताः२ अभिरामाद्रयः४ इदस्य२

दि३

क्रि॰

विहर्तुमिच्छया१ सर्वजनरूपतां२ नभश्चरैः१ दीप्यमानकृताः१ शैलाः१ अपूपरागाः२ प्रसाधिताः३
विधुनानाः२ संतोषं३ जगाम४ संचाराः२ जवंति४ वनसंबंधिनः भ्रमराः५ आकृष्टाः५ स॰७
नक्षत्र४ सम्प्रहाएव५ उन्नरजनूरं४

नानाविहारेषयोज्ञक्रमः॥१॥ यथायथं ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः॥ वनं विशंत्यो वनजायतेक्षणाः क्षणद्युतीनां दधुरेकरूपतां॥२॥ निवृत्तवृत्तोरुपयोधरक्लमः प्रवृत्तनिर्ह्रादिविभूषणारवः॥ नितंबिनीनां भृशमादधे धृतिं नभःप्रयाणादवनौ परिक्रमः॥३॥ घनानि कामं कुसुमानि बिभ्रतः करप्रचेयान्यपहाय शाखिनः॥ पुरोभिसस्रे सुरसुंदरीजनैर्यथोत्तरेच्छा हि गुणेषु कामिनः॥४॥ तनूरलक्तारुणपाणिपल्लवाः स्फुरन्नखांशूत्करमंजरीभृतः॥ विलासिनीबाहुलता वनालयो विलेपनामोदहृताः शिषेविरे॥ निपीयमानस्तबकाः शिलीमुखैरशोकयष्टिश्चलबालपल्लवा॥ विडंबयंती ददृशे वधूजनैरमंददष्टौष्ठकरावधूननं॥६॥ करौ धुनाना नवपल्लवाकृती वृथा कृथा मानिनि मा परिश्रमं॥ उपेयुषी कल्पलताभिशंकया कथं न्वितस्त्रस्यति षट्पदावली॥७॥ जहीहि कोपं दयितोनुगम्यतां पुरानुशेते तव चंचलं मनः॥ इति प्रियं कांचिदुपैतुमिच्छतीं पुरोनुनिन्ये निपुणः सखीजनः॥८॥ समुन्नतैः काशदुकूलशालि

॥२६॥ ॥२६॥

कूजाः४ अग्रे२

करकंपनं३ भ्रमरैः४ फलं पेया शाखा४ चित्तज्ञाः२ युग्मं२ तिरस्कुर्यंती४ गमिष्यनेः२
वक्ष्यमाणप्रकारेण१ अंगनानां२ कंपयती३ प्रसादपामास१ मा कुरुष्व२ नर्तुः२ उपगतावर्तमाना३
सकाशात्२

रहिताः१ प्राप्ताः२ तटप्रदेशैः१ श्रोणिः नद्यः१ कुंजसंगरव२ वननद्यः१
छिनाः३ स्थामीसतानि४ प्राप्त५ उर्ध्वभूमीः प्राप्तवतीनां४

भिः परिक्वणत्सारसपंक्तिमेखलैः॥ प्रतीरदेशैः स्वकलत्रचारवो विभूषिताः कुंजसमुद्रयोषितः॥९॥ विदूरपातेन भिदामुपेयुषश्च्युताः प्रवाहादभितः प्रसारिणः॥ प्रियांकशीताः शुचिमौक्तिकत्विषो वनप्रहासा इव वारिबिंदवः॥१०॥ सखीजनं प्रेमगुरूकृतादरं निरीक्ष्यमाणा इव नम्रमूर्तयः॥ स्थिरद्विरेफांजनशारितोदरैर्विकासिभिः पुष्पविलोचनैर्लताः॥११॥ उपेयुषीणां बृहतीरधित्यकामनांसि जह्रुः सुरराजयोषितां॥ कपोलकाषैः करिणां मदारुणैरुपाहितश्यामरुचश्च चंदनाः॥१२॥ ॥चातुर्भिः श्लोकैः कलापकं॥ ॥स्वगोचरे सत्यपि चित्तहारिणा विलोभ्यमानाः प्रसवेन शाखिनां॥ नभश्चराणामुपकर्तुमिच्छतां प्रियाणि चक्रुः प्रणयेन योषितः॥१३॥ प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लंभिता॥ न किंचिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवं॥१४॥ प्रियेऽपरा यच्छति वाचमुन्मुखी निबद्धदृष्टिः शिथिलाकुलोच्चया॥ समादधे नांशुकमाहितं वृथा विवेद पुष्पेषु न पाणिपल्लवं॥१५॥ सलिल

प्रसवे४ ह४

नीवीबंधः१ सांत्वनया२ दत्ताः३ आकृष्यमाणाः४ पुष्पदानेन४ सपत्नीनामधेयं प्रापिता२
पतितः१ नवबंधः२ निहितः१ भर्तरि२ ददति२

२२

कि०

किसलयाः१ शिरसि निक्षिप्तवत्याः२ कुन्तः१ प्रकटहकृतं कक्षाप्रदेशं प्रियः१
अशाकुवर्तः५ गृहीत्वा४ अनिलान्दोलासहितं यथा४ चञ्चलाः३ आकर्ष्य ६ दूरीकर्तुं४
दीर्घीकृतनयनवता२ अलोपाः ३ उपलक्षितया२

मासंकुलत्वां तं दूषणं संमासडंल्यां कुसुमावतंसकं ॥ रक्तनोपपीडं नुनुदे नितंबिना घनेन कश्चिज्जघनेन कांतया ॥१६॥ कंठत्रं कारेणौ जिलोलनावीनागल्लदुकूलस्तनशालिनोरसा ॥ वलिव्यपायस्फुटरोमराजिनानिरायनत्वादुदरेण तांम्यता ॥१७॥ विलंबमानाकुलकेशपाशया यया चिदाविष्कृतबाहुमूलया ॥ तरुप्रसूनान्यपदिश्य सादरं मनोधिनाथस्य मनः समाददे ॥१८॥ ॥युग्मं॥ ॥व्यपोहितुं लोचनतोमुखानिलैरपारयंतं किल पुष्पजं रजः ॥ पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तना ॥१९॥ इमान्यमूनीत्यपवर्जिते शनैर्यथाभिरामं कुसुमाग्रपल्लवं ॥ विहाय निःसारतयेव भूरुहः पदं वनश्रीर्वनितासु संदधे ॥२०॥ प्रवालशोभा इव पादपल्लवः पराग पांडूकृतपीवरस्तनः ॥ महीरुहः पुष्पसुगंधिरादधे वपुर्गुणोच्छ्रायमिवांगनाजनः ॥२१॥ वरोरुभिर्वारणहस्तपीवरैश्चिराय खिन्नान्नवपल्लवश्रियः ॥ समेऽपि यातुं चरणाननीश्वरान्मदादिव प्रस्खलितः पदे पदे ॥२२॥ विकासिकांचीमणि

समस्थलेऽपि१ चक्रे२ अवाचितत्वात्४ दे१
लब्धवानिव२ उत्कर्षं२ अशक्तान्१

॥२३॥ ॥२३॥

उपलक्षितानि२ आघा२ एताः पदार्थाः भवर्णितः५ निर्गच्छंतीनां४ अवलोकनेकौतुकं५
व्यासानि४ विकसिताम्बुजं२ नविकसितानि४
शक्रो२

रश्मिलक्ष्मया मनोहरोच्छ्रायनितंबशोभया ॥ स्थितानि जित्वा नवसैकतद्युतिं श्रमातिरिक्तैर्जघनानि गौरवैः ॥२३॥ समुत्सुकेव स्फुटकुंकुमालेरुपाहितं श्रीरुपपत्नीविनानि सिक्तैः ॥ दधे निमग्नेषु वलीविभंगिषु स्तनातिभारादुदरातिनम्रतां ॥२४॥ समानकांतीनि तुषारभूषणैः सरोरुहैरस्फुटपत्रपंक्तिभिः ॥ चितानि घर्मांबुकणैः समंततो मुखान्यनुत्फुल्लविलोचनानि च ॥२५॥ विनिर्ययुर्नीनां परिखेदमंथरं सुरांगनानामनुसानुवर्त्मभिः ॥ सविस्मयं रूपयतो नभश्चरान्विवेश तत्पूर्वमिवेक्षणादरः ॥२६॥ ॥कुलकं॥ ॥अथ स्फुरन्मीनविधूतपंकजा विपंकतीरस्खलितोर्मिसंहतिः ॥ पयोवगाढुं कलहंसनादिनी समाजुहावेव वधूः सुरापगा ॥२७॥ प्रशांतघर्माभिभवः शनैर्विवान्विलासिनीभ्यः परिमृष्टपंकजः ॥ ददौ भुजालंबमिवात्तसीकरस्तरंगमालांतरगोचरोऽनिलः ॥२८॥ गतैः सहावैः कलहंसविक्रमं कलत्रभारैः पुलिनं नितंबिभिः ॥ मुखैः सरोजानि च दीर्घलोचनैः सुरस्त्रियः सा

स्पर्शितानि२ आकारयामासेव३ गृहीताः१ शांतकृतः२ बाधा२ वाति३ आलोड्यितुं४
विलासं२ जघनभारैः१ गमनैः२ उल्लसैः सहिताः२

विस्तारः४ निरुध्यन्के१ विस्तला२ नष्टश्रान्तान्१ पर्यवृत्तिविक्षाः१ विलासिनीभिः२ दुस्पर गंधकर्णा३
विक्लिन्नाः२ निरस्य३ प्रविष्टमत्रिसलिलं२ मनःक्षोभं४ महताकष्टेन२ मनःक्षोभः५
विशीर्णमाला३

क्रि०

स्य गुणान्निरासिरे ॥२९॥ विलोलनेत्रान्तविगाहमानया स्खलत्पयोधरवगाढाः सचिवैर्मरुद्भवैः ॥ कथंचिदापः
सुरसुन्दरीजनैर्विषादिश्लिष्टयमंसपेदिरे ॥३०॥ विगाढमात्रे रमणीभिरम्भसि प्रयत्नसंवाहितपीवरोरु
भिः ॥ विभिद्यमाना विससार सारसानुदस्यतीरेषु तरङ्गसंहतिः ॥३१॥ शिलाघनैर्नाकसदामुरःस्थलै
र्बृहन्निवेशैश्च वधूपयोधरैः ॥ तटाभिनीतेन विभिन्नवीचिना रुषेव भेजे कलुषत्वमम्भसा ॥३२॥ वि
धूतकेशाः परिलोलितस्रजः सुराङ्गनानां परिलुप्तचन्दनाः ॥ अतिप्रसङ्गाद्विहितागसो मुहुः प्रकं
पमीयुः सभयादिवोर्मयः ॥३३॥ विपक्षचित्तोन्मथना नखव्रणास्तिरोहिता विभ्रममण्डनेन ये ॥ हृतं
स्य शेषाणि वकुङ्कुमस्य तानि कल्हनीन्दैयोरन्यथाक्षिपः ॥३४॥ प्रियेण संग्रथ्य विपक्षसन्निधावु
पाहितां वक्षसि पीवरस्तने ॥ स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तु
नि ॥३५॥ असंशयं न्यस्तमुपान्तरक्ततां यदेव रोद्धुं रमणीभिरञ्जनं ॥ हृतेऽपि तस्मिन्सलिलेन शु

॥२८॥

प्रायः४

॥२८॥

नितिक्षिप्ताः२ क्षिप्तान्२ श्लाघनायान्३ धुः२ अपनेतुं१ प्रदिताः२ विरिच्य३ क्षालितस्य४
शृङ्गारस्य४ कृतं अपराधः५

तत्याज१ शोकतां२ अतिशयेन गौरवर्णाः५

क्लतां निरासे रागो नयनेषु न श्रियं ॥३६॥ द्युतिं वहन्तो वनितावतंसका हृताः प्रलोभादिव वेगिभिर्जलैः ॥
उपप्लुतास्तत्क्षणशोचनीयतां च्युताधिकाराः सचिवा इवाययुः ॥३७॥ विपत्रलेखा निरलक्तकाधरा हृता
ञ्जनाक्षीरपि बिभ्रतीं श्रियः ॥ निरीक्ष्य रामा बुबुधे नभश्चरैरलंकृतं तद्वपुषैव मण्डनं ॥३८॥ तथानु
पूर्वं कृतभूषणादरः प्रियानुरागेण विलासिनीजनः ॥ यथाञ्जनार्द्रेन नखमण्डनश्रिया ददाह दृष्टीः
प्रतिपक्षयोषितां ॥३९॥ शुभाननाः साम्बुरुहेषु भीरवो विलोलहाराश्चलफेनपङ्क्तिषु ॥ नितान्तगौर्यो
हृतकुङ्कुमेषु केन लेभिरे ताः परभागमूर्मिषु ॥४०॥ हृदाम्भसि व्यस्तवधूकराहते रवं मृदङ्गध्वनिधीर
मुज्झति ॥ मुहुस्तनैस्तालसमं समाददे मनोहरं नृत्यमिव प्रवेपितं ॥४१॥ श्रिया सखेदिङ्गिकमल्लानि सस्मि
तैरलंकृतांबुः प्रतिमागतैर्मुखैः ॥ कृतानुकूल्याः सुरराजयोषितां प्रसादसाफल्यमवाप जाह्नवी ॥४२॥
परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः ॥ उपाययुः कम्पितपाणिपल्लवाः सखीज
मुंचति२ प्रतिबिम्बितैः२ गुणोत्कर्षं४ अनुकूलत्वं२ करकम्पनं स्वीकृतं३
ताडिताः२



(२५)

वेगात् २ उत्सादितैः २ आलिंग्य १ रंपीतैः २ अर्थ्यंतं २
कृत्रिमचेष्टितैः २ मीनेन २ सख्याः ४ संशय ५

क्रि०

नस्यापि विलोकनीयतां ॥४३॥ इयादि वाश्लिष्य संषां हते जसि प्रियं मुदा नंदयति स्म मानिनी ॥
अकृत्रिमप्रेमरसाहितैर्मनो हरंति रामाः कृतकैरपीहितैः ॥४४॥ तिरोहितांतानि नितांतमाकुलै
पां विगाहाद्दलकैः प्रसारिभिः ॥ ययुर्वधूनां वदनानि तुल्यतां द्विरेफवृंदांतरितैः सरोरुहैः ॥४५॥
सख्याः ४ सरोजपत्रे परिलीनषट्पदे विलोलदृष्टेः स्विदमू विलोचने ॥ शिरोरुहाः स्विन्नतपक्ष्मसंततेर्द्वि
फवृंदं नु निशब्दनिश्चलं ॥४६॥ अगूढहासस्फुटदंतकेसरं मुखं स्विदेतद्विकचं नु पंकजं ॥ इति प्र
लीनां नलिनीवने सखीं विदांबभूवुः सुचिरेणयोषितः ॥४७॥ ॥युग्मं॥ ॥ करौ धुनाना नवपल्ल
॥२९॥ वाकृती पयस्यगाधे किल जातसंभ्रमा ॥ सखीषु निर्वाच्यमधार्ष्ट्यदूषितं प्रियांगसंश्लेषमवाप ॥२९॥
मानिनी ॥४८॥ प्रियैः सलीलं करवारिवारितः प्रवृद्धनिःश्वासविकंपिताधरः ॥ सविभ्रमाधूतकरा
ग्रपल्लवो यथार्थतामाप विलासिनीजनः ॥४९॥ उदस्य धैर्यं दयितेन सादरं प्रसादितायाः करवारि

मिथ्या ३ नयं २ सखीनांमध्ये ३ अनिंद्यं ३ नम्री आलिंगनं ३
निरस्य १ धैर्येण ३ सलीलयथा २

त्रिर्यक् २ विलासिन्याः १ कंपः २ ६ ८ १ २ वक्रोक्ति गलितः नावीबंधः २ प्रबद्धः स्नेहैः ४
नलाक्षारसं ३ पश्चात् ४ विकारः ६ स्नानि ३ प्रपसमीपं ५

वारितं ॥ मुखं निमीलन्नयनं नतभ्रुवः श्रियं सपत्नीवदनादिवाददे ॥५०॥ विहस्य पाणौ विधृते धृ
ताम्भसि प्रियेण वध्वा मदनार्द्रचेतसः ॥ सखीव कांची पयसा घनीकृता बभार वीतोच्चयबंधमंशुकं ॥५१॥
निरंजने साचि विलोकितं दृशावयावकं वेपथुरोष्ठपल्लवं ॥ नतभ्रुवो मंडयति स्म विग्रहे बलिक्रिया
चातिलकं तदास्पदं ॥५२॥ प्रियेण सिक्ता चरमं विपक्षतश्चुकोप काचिन्न तुतोष सांत्वनैः ॥ जनस्य रू
ढप्रणयस्य चेतसः किमप्यमर्षोनुनये भृशायते ॥५३॥ निमीलदाकेकरलोलचक्षुषां प्रियोपकं
ठं कृतगात्रवेपथुः ॥ निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे ॥५४॥ इत्थं वि
हृत्य वनिताभिरुदस्यमानं पीनस्तनोरुजघनस्थलशालिनीभिः ॥ उत्सर्पितोर्मिचयलंघिततीरदे
शमौत्सुक्यनुन्नमिव वारिपुरः प्रतस्थे ॥५५॥ तीरांतरेषु मिथुनानि रथांगनाम्नां नीत्वा विलोलित
सरोजवनश्रियस्ताः ॥ संरेमिरे सुरसरिज्जलधौतहारास्तारावितानतरला इव यामवत्यः ॥५६॥ रात्रपद्य २
संक्रांतचंदनरसाहितवर्णभेदं विच्छिन्नभूषणमणिप्रकरांशुचित्रं ॥ बद्धोर्मि नाकवनितापरिभु

उक्तं याप्र रितमिवाश्रितं ५ स्नानपानं ४ अश्रुमिरे २ कंपिताः २ लग्नहाः १ प्रसरताः ४ प्राकटोबक्षः ५ क्रीडिता ५
निविडाः १ उत्सादितं १ उद्धृतानि २ रचितः १ उपलिताः २ विलुलिताः

(२९)

कि०

शोभमानाः४ तासां प्रियं कर्तुं२ मकरंदं५ श्रमगतया४ अल्पतिक्रमेण४ गृहीतानि२
प्रसक्तां४ प्राप्ते सति४ आस्वाद्य५ मत्तां५

॥ ३० ॥ 

न्मुक्तमिंदिवोर्वन्वारसलिलं शायतीयलक्ष्मीं ॥५७॥ ॥ इति श्री किरातार्जुनीये महाकाव्ये लक्ष्म्यंके नारवास्कृतौ वनिताविहारो नामाष्टमः सर्गः ॥८॥ ॥ छ ॥ ॥ वीक्ष्य रंतुमनसः सुरनारीस्तैश्च चित्रपरिधानविभूषाः ॥ तत्प्रियार्थमिव यातुमथास्तं भानुमानुपपयोधि ललंबे ॥१॥ मध्यमोपलनिभे लसदंशावेकतश्च्युतिमुपेयुषि भानौ ॥ द्यौरुवाह परिवृत्तिविलोलां हारयष्टिमिव वासरलक्ष्मीं ॥२॥ अंशुपाणिभिरतीव पिपासुः पद्मजं मधु भृशं रसयित्वा ॥ क्षीबतामिव गतः क्षितिमेष्यन् लोहितं वपुरुवाह पतंगः ॥३॥ गम्यतामुपगते नयनानां लोहितायति सहस्रमरीचौ ॥ आससाद विरहय्य धरित्रीं चक्रवाकहृदयान्यभितापः ॥४॥ मुक्तमूललघुरुज्झितपूर्वः पश्चिमे नभसि संभृतसांद्रः ॥ सामि मज्जति रवौ न विरेजे खिन्नजिह्म इव रश्मिसमूहः ॥५॥ कांतदूत्य इव कुंकुमताम्राः सायमंडनमभि त्वरयंत्यः ॥ सादरं ददृशिरे वनिताभिः सौधजालपतिता रविभासः ॥६॥ अग्रसानुषु नितांतपिशंगैर्भूरुहान्मृदु

॥ ३० ॥ ॥ ३० ॥

नानुभुक्ते२ संतापः३ दर्शनीयतां५ उन्नरकं४ अस्यंतौ एकत्र जातः२ विहाय४
दुःखेन हीनः२ उद्दिश्य त्वरयंत्यः२ अर्द्धास्तमिते सति२
टीका

किरणैः२ निश्चलीकृतत्वात्३ संध्यारागः२ बन्धवः३ तस्त्यां संध्यायां आहितं५ समूहः४
आक्रांतः४

करैरवलंब्य ॥ अस्तशैलगहनं नु विवस्वानाविवेश जलधिं नु महीं नु ॥७॥ ॥ क्षेपकः ॥ ॥ नो रविर्न चतमो न तमिस्रा न द्युतिर्ग्रहगणो न च संध्या ॥ यादृशं प्रथमतः किल सृष्टेस्तादृगेव गगनं श्रियमूहे ॥८॥ आकुलश्चलपतत्रिकुलानामारवैरनुदितौषसरागः ॥ आययावहरिदश्वविपांडुस्तुल्यतां दिनमुखेन दिनांतः ॥९॥ आस्थितः स्थगितवारिदपंक्त्या संध्यया गगनपश्चिमभागः ॥ सोर्म्मि विद्रुमवितानविभासा रंजितस्य जलधेः श्रियमूहे ॥१०॥ प्रांजलावपि जनेन तमर्चिः प्रेमतत्परवणेन नताविहिता ॥ संध्ययानुविदधे विरमंत्या चापलेन सुजनेतरमैत्री ॥११॥ औषसातपभयादिव लीनं वासरच्छविविरामपटीयः ॥ सन्निपत्य शनकैरथ निम्नादंधकारमुदवाप समानि ॥१२॥ एकतामिव गतस्य विवेकः कस्य चिन्न महतोप्युपलेभे ॥ भास्वता निदधिरे भुवनानामात्मनीव पतितेन विशेषाः ॥१३॥ इच्छतां सह वधूभिरभेदं यामिनीविरहिणां विहगानां ॥ आपुरेव मिथुनानि वियोगं लंघ्यते न खलु कालनियोगः ॥१४॥ आका२

प्रौढः३ आगत्य३ चक्रवाकानां छन्नाः२ यानरः३ छन्नानि३ अस्तमिते न२ आतपस्य नाशात्४
निहिताः२ अधरादपः२ पर्वतादेः पदार्थस्य भेदः न प्राप३



(26)

क्रि० दृष्टाति सनितिः २ सावर्ण्ये कृताः २ लोकः ४ तमोपं २ आच्छिन्नानि ३ प्रापितेस्मर त्यक्तविकाशे २
लुप्ताः २ कर्पूरस्य ५ प्राविनाः ५ निरंधिदेशे आपः ४ आच्छिन्नं २ सन्नीकृता २ दुर्लभिदं २ सर्ग ९
चंद्रमसा ४ यत्सूति २

